# Devadibhih Kritam Surya Stotram 20

# देवादिभिः कृतं सूर्यस्तोत्रम् २०

## Document Information

Text title : Devadibhih Kritam Surya Stotram 20

File name : devAdibhiHkRRitaMsUryastotram20.itx

Category : navagraha, mArkaNDeyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : mArkaNDeyapurANa | adhyAya 103/48-56||

Latest update : October 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 12, 2024

*sanskritdocuments.org*

# देवादिभिः कृतं सूर्यस्तोत्रम् २०

त्रैलोक्ये सकले विप्र भ्रममाणे सुरर्षयः ।
देवाश्च ब्रह्मणा सार्द्धं भास्वन्तमभितुष्टुवुः ॥ ४७॥

(देवादय ऊचुः ।)
आदिदेवोऽसि देवानां ज्ञातमेतत्स्वरूपतः ।
स्वर्गस्थित्यन्तकालेषु त्रिधा भेदेन तिष्ठसि ॥ ४८॥

स्वस्ति तेऽस्तु जगन्नाथ धर्मवर्षाहिमाकर ।
जुषस्व शान्तिं लोकानां देवदेव दिवाकर ॥ ४९॥

इन्द्रश्चागत्य तं देवं लिख्यमानं यथाऽस्तुवत् ।
जय देव जगद्व्यापिञ्जयाशेषजगत्पते ॥ ५०॥

ऋषयश्च ततः सप्त वसिष्ठात्रिपुरोगमाः ।
तुष्टुवुर्विविधैः स्तोत्रैः स्वस्ति स्वस्तीति वादिनः ॥ ५१॥

वेदोक्ताभिरथाग्र्याभिर्वालखिल्याश्च तुष्टुवुः ।
भास्वन्तमृग्भिराद्याभिर्लिख्यमानं मुदायुताः ॥ ५२॥

त्वं नाथ मोक्षिणां मोक्षो ध्येयस्त्वं ध्यानिनां परः ।
त्वं गतिः सर्वभूतानां कर्मकाण्डेऽपि वर्तताम् ॥ ५३॥

शं प्रजाभ्योऽस्तु देवेश शन्नोऽस्तु जगताम्पते ।
शन्नोऽस्तु द्विपदे नित्यं शन्नश्चास्तु चतुष्पदे ॥ ५४॥

ततो विद्याधरगणा यक्षराक्षसपन्नगाः ।
कृताञ्जलिपुटाः सर्वे शिरोभिः प्रणता रविम् ॥ ५५॥

ऊचुरेवंविधा वाचो मनः श्रोत्रसुखावहः ।
सह्यं भवतु ते तेजो भूतानां भूतभावन ॥ ५६॥

इति मार्कण्डेयपुराणे त्र्यधिकशततमाध्यायान्तर्गतं

देवादिभिः कृतं सूर्यस्तोत्रं समाप्तम् ।

मार्कण्डेयपुराण । अध्याय १०३/४८-५६ ॥

mArkaNDeyapurANa . adhyAya 103/48-56..

Proofread by PSA Easwaran

*Devadibhih Kritam Surya Stotram 20*

pdf was typeset on October 12, 2024

Please send corrections to *sanskrit@cheerful.com*